॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ७

नारायणगिरिं ते तु गर्जन्तो राक्षसाम्बुदाः ।
अवर्षन्निषुवर्षेण वर्षेणाद्रिमिवाम्बुदाः ॥ १॥

श्यामावदातस्तैर्विष्णुर्नीलैर्नक्तञ्चरोत्तमैः ।
वृतोऽञ्जनगिरीवासीद्वर्षमाणैः पयोधरैः ॥ २॥

शलभा इव केदारं मशका इव पर्वतम् ।
यथामृतघटं जीवा मकरा इव चार्णवम् ॥ ३॥

तथा रक्षोधनुर्मुक्ता वज्रानिलमनोजवाः ।
हरिं विशन्ति स्म शरा लोकास्तमिव पर्यये ॥ ४॥

स्यन्दनैः स्यन्दनगता गजैश्च गजधूर्गताः ।
अश्वारोहाः सदश्वैश्च पादाताश्चाम्बरे चराः ॥ ५॥

राक्षसेन्द्रा गिरिनिभाः शरशक्त्यृष्टितोमरैः ।
निरुच्छ्वासं हरिं चक्रुः प्राणायाम इव द्विजम् ॥ ६॥

निशाचरैस्तुद्यमानो मीनैरिव महातिमिः ।
शार्ङ्गमायम्य गात्राणि राक्षसानां महाहवे ॥ ७॥

शरैः पूर्णायतोत्सृष्टैर्वज्रवक्त्रैर्मनोजवैः ।
चिच्छेद तिलशो विष्णुः शतशोऽथ सहस्रशः ॥ ८॥

विद्राव्य शरवर्षं तं वर्षं वायुरिवोत्थितम् ।
पाञ्चजन्यं महाशङ्खं प्रदध्मौ पुरुषोत्तमः ॥ ९॥

सोऽम्बुजो हरिणा ध्मातः सर्वप्राणेन शङ्खराट् ।
ररास भीमनिह्रादो युगान्ते जलदो यथा ॥ १०॥

शङ्खराजवचः सोऽथ त्रासयामास राक्षसान् ।
मृगराज इवारण्ये समदानिव कुञ्जरान् ॥ ११॥

न शेकुरश्वाः संस्थातुं विमदाः कुञ्जराभवन् ।
स्यन्दनेभ्यश्च्युता योधाः शङ्खरावितदुर्बलाः ॥ १२॥

शार्ङ्गचापविनिर्मुक्ता वज्रतुल्याननाः शराः ।
विदार्य तानि रक्षांसि सुपुङ्खा विविशुः क्षितिम् ॥ १३॥

भिद्यमानाः शरैश्चान्ये नारायणधनुश्च्युतैः ।
निपेतू राक्षसा भीमाः शैला वज्रहता इव ॥ १४॥

व्रणैर्व्रणकरारीणामधोक्षजशरोद्भवैः ।
असृक्क्षरन्ति धाराभिः स्वर्णधारामिवाचलाः ॥ १५॥

शङ्खराजरवश्चापि शार्ङ्गचापरवस्तथा ।
राक्षसानां रवांश्चापि ग्रसते वैष्णवो रवः ॥ १६॥

सूर्यादिव करा घोरा ऊर्मयः सागरादिव ।
पर्वतादिव नागेन्द्रा वार्योघा इव चाम्बुदात् ॥ १७॥

तथा बाणा विनिर्मुक्ताः शार्ङ्गान्नरायणेरिताः ।
निर्धावन्तीषवस्तूर्णं शतशोऽथ सहस्रशः ॥ १८॥

शरभेण यथा सिंहाः सिंहेन द्विरदा यथा ।
द्विरदेन यथा व्याघ्रा व्याघ्रेण द्वीपिनो यथा ॥ १९॥

द्वीपिना च यथा श्वानः शुना मार्जरका यथा ।
मार्जारेण यथा सर्पाः सर्पेण च यथाखवः ॥ २०॥

तथा ते राक्षसा युद्धे विष्णुना प्रभविष्णुना ।
द्रवन्ति द्राविताश्चैव शायिताश्च महीतले ॥ २१॥

राक्षसानां सहस्राणि निहत्य मधुसूदनः ।
वारिजं नादयामास तोयदं सुरराड् इव ॥ २२॥

नारायणशरग्रस्तं शङ्खनादसुविह्वलम् ।
ययौ लङ्कामभिमुखं प्रभग्नं राक्षसं बलम् ॥ २३॥

प्रभग्ने राक्षसबले नारायणशराहते ।
सुमाली शरवर्षेण आववार रणे हरिम् ॥ २४॥

उत्क्षिप्य हेमाभरणं करं करमिव द्विपः ।
ररास राक्षसो हर्षात्सतडित्तोयदो यथा ॥ २५॥

सुमालेर्नर्दतस्तस्य शिरो ज्वलितकुण्डलम् ।

चिच्छेद यन्तुरश्वाश्च भ्रान्तास्तस्य तु रक्षसः ॥ २६ ॥

तैरश्वैर्भ्राम्यते भ्रान्तैः सुमाली राक्षसेश्वरः ।
इन्द्रियाश्वैर्यथा भ्रान्तैर्धृतिहीनो यथा नरः ॥ २७ ॥

माली चाभ्यद्रवद्युद्धे प्रगृह्य सशरं धनुः ।
मालेर्धनुश्च्युता बाणाः कार्तस्वरविभूषिताः ।
विविशुर्हरिमासाद्य क्रौञ्चं पत्ररथा इव ॥ २८ ॥

अर्द्यमानः शरैः सोऽथ मालिमुक्तैः सहस्रशः ।
चुक्षुभे न रणे विष्णुर्जितेन्द्रिय इवाधिभिः ॥ २९ ॥

अथ मौर्वी स्वनं कृत्वा भगवान्भूतभावनः ।
मालिनं प्रति बाणौघान्ससर्जासिगदाधरः ॥ ३० ॥

ते मालिदेहमासाद्य वज्रविद्युत्प्रभाः शराः ।
पिबन्ति रुधिरं तस्य नागा इव पुरामृतम् ॥ ३१ ॥

मालिनं विमुखं कृत्वा मालिमौलिं हरिर्बलात् ।
रथं च सध्वजं चापं वाजिनश्च न्यपातयत् ॥ ३२ ॥

विरथस्तु गदां गृह्य माली नक्तञ्चरोत्तमः ।
आपुप्लुवे गदापाणिर्गिर्यग्रादिव केषरी ॥ ३३ ॥

स तया गरुडं सङ्ख्ये ईशानमिव चान्तकः ।
ललाटदेशेऽभ्यहनद्वज्रेणेन्द्रो यथाचलम् ॥ ३४ ॥

गदयाभिहतस्तेन मालिना गरुडो भृशम् ।
रणात्पराङ्मुखं देवं कृतवान्वेदनातुरः ॥ ३५ ॥

पराङ्मुखे कृते देवे मालिना गरुडेन वै ।
उदतिष्ठन्महानादो रक्षसामभिनर्दताम् ॥ ३६ ॥

रक्षसां नदतां नादं श्रुत्वा हरिहयानुजः ।
पराङ्मुखोऽप्युत्ससर्ज चक्रं मालिजिघांसया ॥ ३७ ॥

तत्सूर्यमण्डलाभासं स्वभासा भासयन्नभः ।
कालचक्रनिभं चक्रं मालेः शीर्षमपातयत् ॥ ३८ ॥

तच्छिरो राक्षसेन्द्रस्य चक्रोत्कृत्तं विभीषणम् ।
पपात रुधिरोद्गारि पुरा राहुशिरो यथा ॥ ३९ ॥

ततः सुरैः सुसंहृष्टैः सर्वप्राणसमीरितः ।
सिंहनादरवो मुक्तः साधु देवेति वादिभिः ॥ ४० ॥

मालिनं निहतं दृष्ट्वा सुमाली मल्यवानपि ।
सबलौ शोकसन्तप्तौ लङ्काअ म् प्रति विधावितौ ॥ ४१ ॥

गरुणस्तु समाश्वस्तः संनिवृत्य महामनाः ।
राक्षसान्द्रावयामास पक्षवातेन कोपितः ॥ ४२ ॥

नारायणोऽपीषुवराशनीभिर्
विदारयामास धनुःप्रमुक्तैः ।
नक्तञ्चरान्मुक्तविधूतकेशान्
यथाशनीभिः सतडिन्महेन्द्रः ॥ ४३ ॥

भिन्नातपत्रं पतमानशस्त्रं
शरैरपध्वस्तविशीर्णदेहम् ।
विनिःसृतान्त्रं भयलोलनेत्रं
बलं तदुन्मत्तनिभं बभूव ॥ ४४ ॥

सिंहार्दितानामिव कुञ्जराणां
निशाचराणां सह कुञ्जराणाम् ।
रवाश्च वेगाश्च समं बभूवुः
पुराणसिंहेन विमर्दितानाम् ॥ ४५ ॥

सञ्चाद्यमाना हरिबाणजालैः
स्वबाणजाअलानि समुत्सृजन्त् ।
धावन्ति नक्तञ्चरकालमेघा
वायुप्रणुन्ना इव कालमेघाः ॥ ४६ ॥

चक्रप्रहारैर्विनिकृत्तशीर्षाः
सञ्चूर्णिताङ्गाश्च गदाप्रहारैः ।
असिप्रहारैर्बहुधा विभक्ताः
पतन्ति शैला इव राक्षसेन्द्राः ॥ ४७ ॥

चक्रकृत्तास्यकमला गदासञ्चूर्णितोरसः ।
लाङ्गलग्लपितग्रीवा मुसलैर्भिन्नमस्तकाः ॥ ४८ ॥

के चिच्चैवासिना छिन्नास्तथान्ये शरताडिताः ।
निपेतुरम्बरात्तूर्णं राक्षसाः सागराम्भसि ॥ ४९ ॥

तदाम्बरं विगलितहारकुण्डलैर्
निशाचरैर्नीलबलाहकोपमैः ।
निपात्यमानैर्ददृशे निरन्तरं
निपात्यमानैरिव नीलपर्वतैः ॥ ५० ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com